## || श्री काली कवच ||

श्री दक्षिणकालिका कवचस्य भैरव ऋषिः, उष्णिक् छन्दः, श्री दक्षिणकालिका देवता, ह्रीं बीजं, हूं शाक्तिः. क्रीं कीलकं मम सर्वतः सर्वेभ्यः रक्षणार्थे अज्ञात शत्रु विनाशनार्थे च पाठे विनियोगः ।

काली मे पुरतः पातु पृष्ठतश्च कपालिनी ।
कुल्ला मे दक्षिणे पातु कुरुकुल्ला तथोत्तरे ॥ ५ ॥

विरोधिनी शिरः पातु विप्रचित्ता तु चक्षुषी ।
उग्रा मे नासिकां पातु कर्णौ चोग्रप्रभा मता ॥ ६ ॥

वदनं पातु मे दीप्ता नीला च चिबुकं सदा ।
घना ग्रीवां सदा पातु बलाका बाहुयुग्मकं ॥ ७ ॥

मात्रा पातु करद्वन्द्वं वक्षोमुद्रा सदावतु ।
मिता पातु स्तनद्वन्द्वं योनिमण्डलदेवता ॥ ८ ॥

ब्राह्मी मे जठरं पातु नाभिं नारायणी तथा ।
ऊरु माहेश्वरी नित्यं चामुण्डा पातु लिङ्गकं ॥ ९ ॥

कौमारी च कटीं पातु तथैव जानुयुग्मकं ।
अपराजिता च पादौ मे वाराही पातु चाङ्गुलीन् ॥ १० ॥

सन्धिस्थानं नारसिंही पत्रस्था देवतावतु ।
रक्षाहीनन्तु यत्स्थानं वर्जितं कवचेन तु ॥ ११ ॥

तत्सर्वं रक्ष मे देवि कालिके घोरदक्षिणे ।
उर्ध्वमधस्तथा दिक्षु पातु देवी स्वयं वपुः ॥ १२ ॥

हिंस्रेभ्यः सर्वदा पातु साधकञ्च जलाधिकात् ।
दक्षिणाकालिका देवी व्यापकत्वे सदावतु ॥ १३ ॥

- इस कवच का 1 हजार पाठ कर सिध्दी कर लें !
- सिद्ध होने पर पुनः अपनी मनोकामना का संकल्प कर इस कवच का एक हजार पाठ करें ! विशेष संकट में १० हजार पाठ करें !
- घोर अभिचार कर्म का नाश करने हेतु १० हजार पाठ के 4 अनुष्ठान करें ..
- निश्चित ही यह कवच कल्याण करता है !

विशेष : कवच पाठ के उपरान्त कवच में स्थित देवियों के लिए हवन कर सकते है |

जैसे क्रीं काल्यै स्वाहा , क्रीं कपालिने स्वाहा , क्रीं कुल्लायै स्वाहा, क्रीं कुरुकुल्लायै स्वाहा .... आदि !

- स्वामी रुपेश्वरानंद आश्रम
W/No – 7607 233 230
https://swamirupeshwaranand.in/